# INDIAN SCHOOL AL WADI AL KABIR

| Class: IX | Department: Sanskrit | Date of submission: NA |
|---|---|---|
| पुनरावृत्ति - कार्यपत्रिका | Topic: पठितावबोधनम् - 1 | Note: Pl. file in portfolio |

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्त प्रश्नानां उत्तराणि संस्कृतेन लिखित । 5**

भारतस्य स्वतन्त्रतासङ्ग्रामे सशस्त्रान्दोलने बङ्गप्रान्तः अग्रेसरः आसीत्। तस्मिन् बङ्गप्रान्ते मेदिनीपुरनामके जनपदे मोहोबनी-ग्रामे नवाशीत्यधिक-अष्टादशशततमे वर्षे (1889) दिसम्बरमासस्य तृतीये दिनाङ्के खुदीरामस्य जन्म अभवत्। तस्य जनकस्य नाम त्रैलोक्यनाथः इति, जनन्याः नाम लक्ष्मीप्रिया देवी च आसीत्। खुदीरामस्य बाल्यकाले एव तस्य पितरौ दिवङ्गतौ। अतः तस्य अग्रजया अपरूपादेव्या एव खुदीरामस्य पालनं पोषणं च कृतम्। बाल्यकालतः एव खुदीरामः असाधारणः आसीत्। साधारणबालानाम् व क्रीडादिषु तस्य मनः न रमते स्म। सः देशवासिषु जायमानान् अत्याचारान् दृष्ट्वा व्यथितः भवति स्म।

**I. एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।)**

(i) भारतस्य स्वातन्त्रता सङ्ग्रामे कः राज्यम् अग्रणी आसीत्?

(ii) खुदीरामस्य जन्म कदा अभवत् ?

(iii) खुदीरामस्य भगिन्याः नाम किम् आसीत्?

**II. पूर्णवाक्येन उत्तरत। (पूर्ण वाक्य में उत्तर दीजिए।)**

(i) खुदीरामस्य पितरौ नाम किम् आसीत्?

(ii) अत्याचारं दृष्ट्वा कः दुःव्यथितः भवति स्म?

(iii) खुदीरामस्य पालनं पोषणं कया कृतम् ?

**III. निर्देशानुसारम् उत्तरत। (निर्देशानुसार उत्तर दीजिए।)**

(i) 'पितुः' पदस्य पर्यायपदं गद्यांशात् चित्वा लिखत।

(ii) 'तस्य जनकस्य नाम त्रैलोक्यानाथः आसीत्।' अत्र 'तस्य' सर्वनामपदं कस्मै प्रयुक्तम्?

अथवा

(i) 'जायमानान् अत्याचारान्' अनयोः पदयोः विशेष्यपदं किमस्ति ?

(ii) 'बाल्यकालतः एव खुदीरामः असाधारणः आसीत्।' अत्र क्रियापदं किमस्ति ?

*उत्तराणि - (i) बङ्गप्रान्तः (ii) नवाशीत्यधिक-अष्टादशशततमे (1889) (iii) अपरूपादेवी*

*II. (i) खुदीरामस्य जनकस्य नाम त्रैलोक्यनाथः इति, जनन्याः नाम लक्ष्मीप्रिया देवी च आसीत्।*

*(ii) अत्याचारारं दृष्ट्वा खुदीरामः व्यथितः भवति स्म।*

*(iii) खुदीरामस्य पालनं पोषणं च तस्य अग्रजया अपरूपादेव्या कृतम्।*

*III. (i) जनकस्य (ii) खुदीरामाय        अथवा        (i) अत्याचारान्   (ii) आसीत्*

**2.** अधोलिखितं पद्याशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।  **5**

भारतीयैकतासाधकं संस्कृतम्, भारतीयत्वसम्पादकं संस्कृतम्।
ज्ञानपुञ्जप्रभादर्शकं संस्कृतम्, सर्वदानन्दसन्दोहदं संस्कृतम्।।

**I. एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।)**

(i) प्रस्तुतश्लोके कस्य महत्त्वं कथितम् अस्ति?  (ii) भारतीयैकतायाः साधकं किम् अस्ति ?

(iii) संस्कृतभाषा कस्य प्रभादर्शकमस्ति?

**II. पूर्णवाक्येन उत्तरत। (पूर्ण वाक्य में उत्तर दीजिए।)**

(i) संस्कृतभाषा कस्य प्रभाम् दर्शयति ?      (ii) सर्वदा आनन्दं प्रदायिका किम् अस्ति ?

(iii) भारतीयसंस्कृतेः पूर्णज्ञानं कस्य अध्ययनं विना सम्भवं नास्ति ?

**III. निर्देशानुसारम् उत्तरत। (निर्देशानुसार उत्तर दीजिए।)**

(i) संगठनं पदस्य किं पर्यायः पद्यांशे प्रयुक्तम्?

(ii) सर्वदानन्दसन्दोहदं संस्कृतम् अत्र विशेषणम् पदं किम् अस्ति?

अथवा

(i) 'ज्ञानपुञ्ज अत्र विपयर्यपदं किम् अस्ति?          (ii) 'संस्कृतम्' पदे धातुः कः?

**उत्तराणि**

*I.  (i) संस्कृतस्य (ii) संस्कृतम्  (iii) ज्ञानपुञ्जस्य*

*II.  (i) संस्कृतभाषा ज्ञानपुञ्जस्य प्रभा दर्शयति ।  (ii) सर्वदा आनन्दं प्रदायिका 'संस्कृतं' अस्ति।*
*(iii) भारतीयसंस्कृतेः पूर्णज्ञानं संस्कृतस्य अध्ययनं विना सम्भवं नास्ति ।*

*III. (i) एकता   (ii) सर्वदान्दसन्दोहदं     अथवा      (i) अज्ञानपुञ्जम् (ii) कृ*